# श्रीकान्तिमतीश्वर्यष्टकम्

Shri Kantimatishvari Ashtakam

sanskritdocuments.org

November 17, 2018

# Shri Kantimatishvari Ashtakam

# श्रीकान्तिमतीश्वर्यष्टकम्

## Sanskrit Document Information

Text title : Tirunelveli Kanthimathi Ambal kAntimatIshvaryaShTakam

File name : kAntimatIshvaryaShTakam.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, aShTaka

Location : doc_devii

Transliterated by : NA

Proofread by : NA, PSA Easwaran psaeaswaran at gmail.com

Description/comments : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Latest update : November 18, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 17, 2018

*sanskritdocuments.org*

Shri Kantimatishvari Ashtakam

# श्रीकान्तिमतीश्वर्यष्टकम्

॥ श्रीः ॥

श्रीमद्वेणुवनेश्वरस्य रमणीं शीतांशुबिम्बाननां
शिञ्जन्नूपुरकोमलाङ्घ्रिकमलां केयूरहारान्विताम् ।
रत्नस्यूतकिरीटकुण्डलधरां हेलाविनोदप्रियां
श्रीमत्कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ १॥

तत्त्वज्ञानिहृदब्जमध्यनिलयां ताम्रापगातीरगां
कारुण्याम्बुनिधिं तडित्तुलितभां तालीदलश्यामलाम् ।
लीलासृष्टिविधायिनीं तनुभृतां तात्पर्यबोधाप्तये
तन्वीं कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ २॥

सङ्गीतामृतसिन्धुमध्यभवनां साहित्यनित्यादरां
स्वारस्याद्भुतनाट्यवीक्षणपरां सालोक्यमुक्त्यादिदाम् ।
साधुभ्यः सकलामरार्थितमहासाम्राज्यलक्ष्मीप्रदां
साध्वीं कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ३॥

कल्याणीमखिलाण्डकोटिजननीं कल्हारदामोज्ज्वलां
कस्तूरीतिलकाभिरामनिटिलां कञ्जासनाराधिताम् ।
कामारेःकनकाचलेन्द्रधनुषः कारुण्यवारान्निधेः
कान्तां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ४॥

भक्तानां भयजालभञ्जनकरीं भान्वब्जशुक्रेक्षणां
भाग्योदारगुणान्वितां भगवतीं भण्डासुरध्वंसिनीम् ।
भास्वद्रत्नकिरीटकुण्डलधरां भद्रासनाध्यासिनीं
भव्यां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ५॥

देवानामभयप्रदां विधिनुतां दुष्टापहन्त्रीं सुखां
देशानेकदिगन्तमध्यनिलयां देहार्धदास्यप्रियाम् ।

माधुर्याकरचन्द्रखण्डमकुटां देवाङ्गनासेवितां
देवीं कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ६॥

दुष्टाटोपविनाशनैकनिपुणां दौर्भाग्यविच्छेदिनीं
दुर्मात्सर्यमदाभिमानमथिनीं दुःखापहां प्राणिनाम् ।
दुर्वारामितदैत्यभञ्जनकरीं दुःस्वप्नहन्त्रीं शिवां
दुर्गां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ७॥

मन्दस्मेरमुखाम्बुजां मरकतश्यामां महावैभवां
मातङ्गीं महिषासुरस्य शमनीं मातङ्गकुम्भस्तनीम् ।
मन्दारद्रुमसन्निभां सुमधुरां सिंहासनाध्यासितां
मान्यां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ८॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितं श्रीकान्तिमतीश्वर्यष्टकं सम्पूर्णम् ।

A Rare Composition on Tirunelveli Kanthimathi Ambal

NA, PSA Easwaran psaeaswaran at gmail.com

*Shri Kantimatishvari Ashtakam*

pdf was typeset on November 17, 2018

Please send corrections to *sanskrit@cheerful.com*